एव "यादृशं भजते स्त्री हि सुतं सूते तथाविधम् । तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियो रक्षेत् प्रयत्नतः" इति । यादृशं पुरुषमृतुकाले स्त्री मनसा भजते तत्समानशीलं पुत्रं जनयतीति पूर्वार्द्धार्थः । अतएवाहतुः शङ्खलिखितौ "यस्मिन् भावोऽर्पितः स्त्रीणामार्त्तवे तच्छीलं जनयन्तीति" । मानसव्यभिचारादपि स्त्रियं रक्षेदिति शेषः । तथा च मनुना तस्मादित्यादिनोत्तरार्द्धेनायमेवार्थो दर्शितः । परिरक्षणोपायानाह मनुरेव "अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् । शौचे धर्मे च पक्त्यां च पारिणाह्यस्य चेक्षणे" इति । अर्थस्य संग्रहे स्वेन समानीतार्थसंविधाने । व्यये स्वेनोक्तव्यये । शौचे गृहादिशुद्धिकरसंमार्जनोपलेपनादौ । धर्मे अग्निहोत्राद्यनुकूललौकिकव्यापारे । पक्त्यां पाकव्यापारे । पारिणाह्यं पीठादि गृहोपकरणं तस्य ईक्षणे विचारणे । निरन्तरगृहव्यापारनियोजनात् पुरुषान्तरचिन्तारहितं यथा भवति भार्यायाः तथा कुर्यादिति तात्पर्यार्थः । वृहस्पतिरपि "आयव्ययेऽथ संस्कारे गृहोपस्कररक्षणे । शौचाग्निकार्ये संयोज्याः स्त्रीणां शुद्धिरियं स्मृता" इति । एवंविधव्यापारासक्तचित्ततया साध्व्य इति व्यपदिश्यन्त इत्याह मनुः "आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः" इति । आत्मना गृहव्यापारासक्तेनान्तःकरणेन सुरक्षिताः साध्व्यः । आप्तपुरुषरक्षितास्तु स्त्रियो न सम्यग्रक्षिता इत्याह स एव "अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः" इति । आप्तकारिभिः पुरुषैः गृहे रुद्धा इत्यन्वयः । आप्ताश्च ते कारिणश्चाप्तकारिणः । अरक्षिताः सम्यग्रक्षाविहीना इत्यर्थः । भर्त्तुर्द्धर्मनिष्ठत्वमपि स्त्रीणां रक्षणोपाय इति दर्शयितुं स एवाह "यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि । तादृग्गुणा सा भवति समुद्रेणेव निम्नगा । अक्षमाला वशिष्ठेन संयुक्ताऽधमयोनिजा । शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्" इति । भार्याया भरणमप्यावश्यकमित्याह स एव "देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः । तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन्" । देवैर्दत्ता देवदत्ता दैववशादायातेति यावत् । तां भार्यां स्वयंवरे पतिर्विन्दते । तत्र स्वव्यापाराभावाद्देवदत्तामित्यनेन विवाहलक्षणस्य स्त्रीपुंसयोः सम्बन्धस्य न स्वाधीनत्वं किन्त्वाहि दैवकृतत्वमिति दर्शितम् । दैवदत्तत्वञ्च स्त्रीणाम् "सोमोऽददद्गन्धर्वाय गन्धर्वोऽदददग्नये । रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमाम्" इत्यादिभ्यः श्रुतिवाक्येभ्योऽवगम्यते । तेन दैवैर्दत्ताया अभरणेन दातॄणां देवानां द्रोह आपद्यते इत्यर्थवाद इत्युक्तं मदनरत्ने । न च साध्वीमित्यस्य पतिव्रतामित्यर्थपरत्वेन व्यभिचारिण्या भरणमनावश्यकमिति वक्तव्यम् । तस्या अपि कदन्नादिनाऽवश्यभरणीयत्वात् । तथा च नारदः "व्यभिचारे स्त्रिया मौण्ड्यमधःशयनमेव च । कदन्नञ्च कुवासश्च कर्म चावस्करोज्झनम्" इति । स्त्रियारत्यर्थं व्यभिचारे जाते मुण्डनमधःशयनञ्च कारयेत् । कदन्नं कुवासश्च भरणार्थं दद्यात् । अमेध्यशोधनरूपं कर्म कारयेदित्यर्थः । दोषरहिताया भार्यायाः परित्यागनं प्रत्याह नारदः "अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावतीम् । त्यजन् भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसा" इति । विष्णुरपि "निर्दोषां परित्यजन् पत्नीञ्चेति" चौरवच्छास्य इत्यनुषङ्गः । निर्दोषां त्यागहेतुभूतदोषरहिताम् । दण्डेन स्थापयितुमशक्ये त्वाह योगीश्वरः "आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् । त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियः" इति । तृतीयांशं स्वधनतृतीयांशम् । राज्ञा भार्याया दाप्यः । अल्पधनः भरणमात्रपर्याप्तं धनं दाप्य इत्यर्थः" ।

**स्त्रीपुंस** पु० द्वि० स्त्री च पुमांश्च अच्समा० । मिलितयोः [स्त्रीपुरुषयोः ।

**स्त्रीपुंसलक्षणा** स्त्री स्त्रीपुंसयोर्लक्षणमस्याम् । स्तनश्मश्रुप्रभृतिस्त्रीपुरुषचिह्नधारिण्यां स्त्रियाम् पोटायाम् अमरः

**स्त्रीप्रिय** पु० ६त० । १आम्रवृक्षे त्रिका० । २नारीप्रियमात्रे त्रि०

**स्त्रीमुखप** पु० स्त्रीमुखं पाति पा—क । दोहलवृक्षे राजनि० ।

**स्त्रीरोग** पु० ६त० । स्त्रीणां रोगे योनिरोगादौ सुश्रुतः ।

**स्त्रीलिङ्ग** पु० स्त्रिया इव लिङ्गं तत्कार्यं यस्य । स्त्रीलिङ्गविहितव्याकरणोक्तसंस्कारयुक्ते १शब्दभेदे । ६त० स्त्री२चिह्ने स्तनादौ न० ।

**स्त्रीवश** पु० ६त० । स्त्रीवशीभूते ।

**स्त्रीविधेय** पु० ६त० । स्त्रीवशीभूते ।

**स्त्रीसंग्रहण** न० स्त्रियाः संग्रहणं यत्र । परस्त्रीहरणरूपे विवादपदभेदे । तत्स्वरूपादिकं वीरमि० दर्शितं यथा "अथ स्त्रीसंग्रहणाख्यं व्यवहारपदम् । तस्य त्रैविध्यमाह वृहस्पतिः ""पापमूलं संग्रहणं त्रिप्रकारं